कर्णाटक सर्वकारः

# पर्याय–शैक्षणिककार्ययोजना –2021–22

## संस्कृतनन्दिनी –2 SAMSKRITA-NANDINEE-2

## प्रथमभाषा – संस्कृतम् FIRST LANGUAGE SAMSKRITAM

## नवमी कक्ष्या 9TH STANDARD


**विषयपरिणताः –**

1. **वि॥ नरसिंह भागवतः**, जनसेवा विद्याकेन्द्र चन्नेनहळ्ळि, बेङ्गलूरु ।
2. **वि॥ देवरु भट्टः** , आर्. वि. बालिका प्रौढशाला जयनगर बेङ्गलूरु ।
3. **वि॥ प्रसाद भट्टः**, भारतमाता बालिका प्रौढशाला हनुमन्तनगर, बेङ्गलूरु ।

**परिशोधकः –**

**डा॥ वेङ्कटरमण देवरु भट्टः**, संस्कृतविषयपरिवीक्षकः. आयुक्तानां कार्यालयः, बेङ्गलूरु


## शिक्षकाणां वृत्तिपरप्रगतिः

## शिक्षणम् एवं प्रशिक्षणसंस्था, बेङ्गलूरुमण्डलम्

## पर्याय–शैक्षणिककार्ययोजना –2021–22

### नवमीकक्ष्या , सेप्टेम्बर्मासः

| क्रम सङ्ख्या | मासः / सप्ताहः Month / week | अधिगमफलानि Learning out come | निर्देशात्मक क्रियाकलापाः Activity | मौल्यमापन– क्रियाकलापाः Evaluation activity |
|---|---|---|---|---|
| 1 | **सेप्टेम्बर्मासः ( September) –2021** | | | |
| | **प्रथमसप्ताहः (1st week)**<br>क्रियाकलापः–1 | **सिद्धारूढभारती – गद्यम्**<br>❖ पाठस्य पठनम्<br>❖ समाजसुधारकानां परिचयः<br>❖ स्वातन्त्र्यनेतानां परिचयः<br>❖ सिद्धारूढस्य बाल्यवृत्तान्तः । | ➢ पाठस्य आरोहण–अवरोहणपूर्वकं पठनम् ।<br>➢ पञ्चदशस्वातन्त्र्य–योधानां नामानां सङ्ग्रहः।<br>➢ बाल्यवृत्तान्तविषये चर्चा। स्वीयानुभवकथनम्। | ▪ स्पष्टतया पाठस्य पठनम्।<br>▪ समानार्थकपदस्य चयनम्।<br>▪ बाल्यवृत्तान्तविषये लघुलेखनम् । |
| | क्रियाकलापः–2 | ❖ 'ज्ञाने सर्वेषाम् अधिकारः' इत्यवगमनम् ।<br>❖ जाति–मत–धर्माणां प्रति ज्ञानम् ।<br>❖ शिरडिसायिबाब, कबिरदास,सन्त शिशुनाळ–शरीफादि महनीयानां परिचयः। | ➢ वाद–प्रतिवादविषये छात्र–अध्यापकयोः चर्चा।<br>➢ द्वयोः यात्राक्षेत्रयोः विषये ज्ञानप्राप्तिः।<br>➢ कन्नडभाषायाः दाससाहित्य–विषयावगमनम् । | ▪ कबीरदासमहोदयस्य विषये लिखत ।<br>▪ दाससाहित्यविषये लघुलेखनम् । |
| | क्रियाकलापः–3 | ❖ स्वातन्त्र्य सङ्ग्रामस्य परिचयः।<br>❖ सिद्धारूढभारती महोदयस्य योगदानम्।<br>❖ 'ओम् नमः शिवाय' इत्यस्य मन्त्रस्य महत्त्वम् ।<br>❖ सिद्धारूढभारती महोदयस्य सर्वधर्मसमन्वयः। | ➢ हुब्बळ्ळिनगरस्य भौगोलिकपरिचयः ।<br>➢ प्रथमस्वातन्त्र्यसङ्ग्रामस्य विचारे चर्चा ।<br>➢ सिद्धारूढभारतीमहोदयस्य उपदेशसङ्ग्रहः ।<br>➢ उत्सवानां परिचयः । | ▪ सिद्धारूढमठे के के उत्सवाः आचर्यन्ते ? |
| | **द्वितीयसप्ताहः** | ❖ कृदन्ताव्ययानि – व्याकरणपाठः । | ➢ नामपद–कृदन्तपदानाम् उपयोगज्ञानम् । | ▪ क्त्वाप्रत्ययम् उपयुज्य पञ्चवाक्यानि रचयत । |

| | | | | |
|---|---|---|---|---|
| | **(2nd week)**<br>क्रियाकलापः–1 | ❖ नामपद–क्रियापद–अव्ययानां विषये अवगमनम् । | ➢ अनुच्छेदं पठित्वा कृदन्तपदानि पृथक् कृत्वा प्रत्ययानां लेखनम्।<br>➢ कृदन्तप्रत्ययान् उपयुज्य वाक्यरचना कौशलम् । | ▪ तुमुन्प्रत्ययम् उपयुज्य पञ्चवाक्यानि रचयत ।<br>▪ ल्यप्प्रत्ययम् उपयुज्य पञ्चवाक्यानि रचयत । |
| | क्रियाकलापः–2 | ❖ क्त्वा–तुमुन्–ल्यप् प्रत्ययानां विषये अवबोधनम् ।<br>❖ सामान्य–कृदन्ताव्ययानां भेदज्ञानपूर्वक–प्रयोगकौशल–सम्पादनम् । | ➢ सामान्य–अव्ययानां कृदन्ताव्ययानां च भेद–अवगमनपूर्वक प्रयोगकौशल–सम्पादने चर्चा ।<br>➢ कृदन्त प्रत्ययानाम् उपयोगविषये वार्तालापः ।<br>➢ विविधधातुभ्यः क्त्वा–तुमुन्–ल्यप् प्रत्ययाः भवन्ति चेत् रूपाणां विषये चर्चा । | ▪ अनुच्छेदं पठित्वा क्त्वाप्रत्यययुक्तपदानि पृथक् कुरुत ।<br>▪ ल्यप् प्रत्ययः कदा भवतीति उदाहरणं ददत । |
| | **तृतीयसप्ताहः**<br>**(3rd week)**<br>क्रियाकलापः–1 | ❖ तिङन्तम् – व्याकरणम्<br>❖ धातुः+विभक्तिप्रत्ययः + आख्यातप्रत्ययः = क्रियापदम् ।<br>❖ दशलकाराणां परिचयः।<br>❖ परस्मैपद–आत्मनेपदक्रियापद रूपाणां परिचयः । | ➢ कालादि विषये दशलकाराः कथं प्रवर्तन्ते इत्यस्मिन् विषये चर्चा ।<br>➢ आत्मनेपद–परस्मैपदक्रियारूपाणां लेखनं पठनं च । | ▪ दशलकाराः तेषाम् अर्थाः के इति लिखत ।<br>▪ अनुच्छेदमेकं स्वीकृत्य क्रियापदं चित्वा तस्य लकारं लिखत । |
| | क्रियाकलापः–2 | ❖ उपसर्गाः–व्याकरणपाठः ।<br>❖ प्र,परा, इत्यादि निपाताः धातुना सहयोगे उपसर्गाः भवन्ति ।<br>❖ उपसर्गाः धातोः पूर्वं भवन्ति इति ज्ञानम् । | ➢ उपसर्गेण धातोः अर्थः कथं व्यत्ययः भवति इति चर्चा ।<br>➢ अर्थव्यत्यस्थानां धातूनां वाक्ये उपयोगः कथं करणीयमिति । | ▪ द्वाविंशति उपसर्गान् लिखत।<br>▪ एकम् अनुच्छेदं पठित्वा उपसर्गयुक्तानि पदानि पृथक् कुरुत । |
| | **चतुर्थसप्ताहः**<br>**(4th week)**<br>क्रियाकलापः–1 | ❖ गतानुगतिको लोकः – पूरकपाठः ।<br>❖ लोकस्य वर्तनं कथं भवति इति अस्मिन् पाठे उक्तम् ।<br>❖ जनाः केवलं पूर्वैः | ➢ गद्यस्य अर्थावगमनपूर्वकं पठनम् ।<br>➢ शृगाल–मार्जालन्यायविषये चर्चा ।<br>➢ गृहे पालकानां वर्तनं इतरसदस्येषु कथं | ▪ कथामेकां सरलसंस्कृतभाषया लिखत । |

| | | | | |
|---|---|---|---|---|
| | | कृतं कार्यमेव अनुसरन्ति इति अवगच्छन्ति । | परिणमतेति वर्तालापः । | |
| | क्रियाकलापः–2 | ❖ छन्दः – व्याकरणम् ।<br>❖ काव्यरचनावसरे अनुगम्यमान लघु-गुरु अक्षराणां गणनाञ्च ज्ञानम् ।<br>❖ अनुष्टुभ् छन्दसः नियमावगमनम्। | ➢ लघु–गुरु अक्षराणां गणानाञ्च विषये बोधनम् ।<br>➢ छन्दसः उपयोग महत्त्वविषये च अधिगमनम् ।<br>अनुष्टुभ् छन्दसः उदाहरणानाम् अध्ययनम् । | ▪ सुभाषितस्य एकं पादं स्वीकृत्य प्रस्तारं लिखत ।<br>▪ अनुष्टुभ् छन्दसः श्लोकं लिखत । |
| | क्रियाकलापः–3 | ❖ पितरं प्रति पत्रम् – व्याकरणम् ।<br>❖ पत्रलेखनस्य महत्त्वम्।<br>❖ पत्रलेखने विद्यमानाः भेदाः ।<br>❖ पत्रलेखनकौशलसम्पादनम् । | ➢ पत्रलेखनप्रकारस्य सोपानानि कानि इति ।<br>➢ सहोदरं प्रति पत्रं लिखन्ति । | ▪ मातरं प्रति पत्रं लिखत ।<br>▪ पत्रलेखनसोपानानि कानि ? |

**अभ्यासपत्रिका –1. सिद्धारूढभारती, तिङन्तः उपसर्गाश्च**

**सूक्तोत्तरचयनप्रश्नाः–**

1. धातुः अस्य मूलरूपं भवति ।

A) प्रातिपदिकस्य B) सुबन्तस्य C) कृदन्तस्य D) क्रियापदस्य

-----------------------------------------------------------

2. लोट्लकारस्य कालः भवति।

A) आज्ञा B) भविष्यत् C) वर्तमान D) भूत

-----------------------------------------------------------

3. 'पठिष्यति' अस्य उत्तमपुरुष–बहुवचनरूपम् इदं भवति ।

A) पठिष्यथ B) पठिष्यामः C) पठिष्यति D) पठिष्यन्ति

-----------------------------------------------------------

4. संस्कृतभाषायां प्रायः एतावन्तः धातवः सन्ति ।

A) 2000 B) 1000 C) 2500 D) 1800

-----------------------------------------------------------

5. अत्र समीचीनं वाक्यम् इदं भवति ।

A) त्वं पठति । B) अहं पठाव । C) सः पठसि । D) अहं पठामि

-----------------------------------------------------------

6. धातोः अयं लकारः भूतकालसूचकं भवति।

A) लृट्  B) लङ्  C) लोट्  D) लट्

-----------------------------------------------------------------

7. क्रियापदस्य नामान्तरम् इदं भवति ।

A) सुबन्तम्  B) कृदन्तः  C) धातुः  D) तिङन्तम्

-----------------------------------------------------------------

8. धातोः पूर्वम्  उपसर्गः भवति तदा क्त्वा स्थाने अयं प्रत्ययः भवति ।

A. ल्यप्  B. क्तवतु  C. तुमुन्  D. क्त

-----------------------------------------------------------------

9. 'बालकः पुस्तकं संपठ्य उत्तरं लिखति' अत्र उपसर्गः अस्ति ।

A. पु  B. सम्  C. उ  D. बा

-----------------------------------------------------------------

10. एषः महोदयः सिद्धप्पस्य गुरुः  अभवत्

A. श्रीगजदण्डस्वामी  B. श्रीजगदण्डस्वामी  C. श्रीगुरुदण्डस्वामी  D. श्रीनिजगुणस्वामी

-----------------------------------------------------------------

11. कैवल्यपद्धतिः एतस्य महोदयस्य ग्रन्थः ।

A. बाणस्य  B. श्रीकालिदासस्य  C. श्रीनिजगुणशिवयोगिनः  D. श्रीजगदण्डस्वामिनः

-----------------------------------------------------------------

12. सिद्धप्पस्य पितुः नाम इदम् अस्ति ।

A. शान्तप्पः  B. गुरप्पः  C. शान्तगुरुः  D. गुरुशान्तप्पः

-----------------------------------------------------------------

**2. इतरवचनद्वयं लिखत–**

1. ----------------- पठथः ----------------------।
2. वर्षस्य -------------------- -------------------- ।
3. ---------------- -------------------- गच्छन्ति ।
4. ----------------- अनमताम् ----------------------।
5. ----------------- ------------------ ग्रन्थः ।

**3.उदाहरणानुसारं भूतकालवाक्यानि लिखत–**

| वर्तमानकाले | भूतकाले |
|---|---|
| उदा– 1. सः पठति । | 1. सः अपठत् । |
| 2. रामः वनं गच्छति । | 2. ------------------------- । |
| 3. रमा लेखन्या लिखति । | 3.------------------------- । |
| 4. बालकः उत्तरं यच्छति । | 4.------------------------- । |
| 5. वृक्षात् फलं पतति । | 5.------------------------- । |

**4. उचितक्रियापदेन रिक्तस्थानं पूरयत–**

1. बालकाः पुस्तकं ------------------------------------।
2. सिंहः वने ------------------------------------।

3. गगने मेघाः ------------------------------------।
4. अहं पूजाम् ------------------------------------।

**5. पुरुषानुगुणम् अधोनिर्दिष्टानि रूपाणि विभजत–**

| |
|---|
| शोभते, अगायताम्, धावसि, अपठः नृत्यामि, अक्रीडाम, लिखति, करोति, चोरयन्ति, गच्छतम्, वदावः, पठन्तु, वन्देथे, ताडयन्ति, खादन्ति, नयताम् |

| प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|
| | | |
| | | |
| | | |
| | | |

**5.संयोजयत–**

| अ | आ | |
|---|---|---|
| अहम् | गायति । | ---- ---------------- |
| त्वम् | गच्छामः । | --------------------- |
| गौरी | पठ । | --------------------- |
| माधवः | लिखथ । | --------------------- |
| वयम् | अपिबम् । | --------------------- |
| यूयम् | खादति । | --------------------- |

***********

**<u>अभ्यासपत्रिका–2– कृदन्तः छन्दश्च</u>**

**सूक्तोत्तरचयनप्रश्नाः–**

1. पठति – क्रियापदम् :: अपि– -------- अत्र चतुर्थपदम् इदं भवति ।
   A. क्रियापदं   B. नामपदं   C. सुबन्तः   D. कृदन्तः

---------------------------------------------------

2. पठित्वा– क्त्वाप्रत्ययः :: विस्मृत्य – ------ अत्र चतुर्थपदम् इदं वर्तते ।
   A. तुमुन् प्रत्ययः   B. ल्यप् प्रत्ययः   C. तिङ्प्रत्ययः   D. सुप्प्रत्ययः

---------------------------------------------------

3. नि+ तुमुन् = नेतुम् भवति, गम् + तुमुन् – --- अत्र इदं रूपं भवति ।
   A. गेयम्   B. गातुम्   C. गन्तुम्   D. गीतुम्

---------------------------------------------------

4. अत्र समूहेतरपदं लिखत ।

A. आगत्य B. समर्च्य C. अनुभूय D. विलिख्य

--------------------------------------------------------------------

5. 'कृत्' प्रत्ययाः एतेभ्यः भवन्ति ।

A. धातुभ्यः B. सुबन्तेभ्यः C. क्रियापदेभ्यः D. प्रातिपदिकेभ्यः

--------------------------------------------------------------------

6. सकर्मकधातोः कर्मणि प्रयोगे अयं प्रत्ययः प्रयुज्यते ।

A. शानच् B. क्तप्रत्ययः C. शतृ D. क्तवतु

--------------------------------------------------------------------

7. 'छन्दश्शास्त्रस्य शास्त्रस्य रचयिता एषः अस्ति ।

A. व्यासः B. कालिदासः C. भरतमुनिः D. पिङ्गलाचार्य

--------------------------------------------------------------------

8. गणविभागम् अस्मिन् शास्त्रे कुर्वन्ति ।

A. वेदान्तशास्त्रे B. छन्दश्शास्त्रे C. नाट्यशास्त्रे D. गणितशास्त्रे

--------------------------------------------------------------------

9. श्लोके अक्षराणां पदानां नियता विन्यासरीतिः एव भवति ।

A. छन्दः B. सुबन्तः C. अलङ्कारः D. कारकम्

--------------------------------------------------------------------

10. समूहेतरपदं अत्र चिनुत ।

A. लघुः B. गुरुः C. पिङ्गलाचार्यः D. मम्मटः

--------------------------------------------------------------------

11. 'मध्यगुरुः' अयं गणः भवति ।

A. जगणः B. मगणः C. भगणः D.सगणः

--------------------------------------------------------------------

**1. अत्र एतेषां प्रत्ययनाम लिखत ।**

गत्वा = ------------------------ अनुभूय = ------------------------

ज्ञात्वा = ------------------------ भवितुम् = ------------------------

नेतुम् = ------------------------ निपीय = ------------------------

कर्तुम्= ------------------------ आगत्य= ------------------------

निक्षिप्य = ------------------------ कृत्वा = ------------------------

निधाय = ------------------------ लेखितुम् = ------------------------

2. संयोज्य लिखत ।

| अ | आ | उत्तरम् |
|---|---|---|
| दत्वा | ल्यबन्ताव्ययम् | ------------- |
| विलिख्य | तुमुन्नन्ताव्ययम् | ------------- |
| निपीय | क्त्वान्ताव्ययम् | ------------- |
| परिवर्तितुं | ल्यबन्ताव्ययम् | ------------- |

3. अधोलिखितेषु वाक्येषु कर्तृ–कर्म–कृदन्त–क्रियापदानि पृथक् कुरुत–

1. अध्यापकः शालां गत्वा पाठयति ।
2. बालकः जलं पीत्वा गच्छति ।
3. बालिका गृहं गत्वा पाठं लिखति ।
4. कालिदासः नाटकानि विलिख्य महाकविः अभवत् ।
5. गङ्गादेवी विजयनगरम् आगत्य काव्यं अरचयत् ।

1. एकवाक्येन उत्तरं लिखत–

1. छन्दः नाम किम् ?

-------------------------------------------------------

2. छन्दश्शास्त्रस्य आद्यः प्रवर्तकः कः ?

-------------------------------------------------------

3. कति गणाः सन्ति ?

-------------------------------------------------------

4. अनुष्टुबि प्रतिपादे कति अक्षराणि भवन्ति ?

-------------------------------------------------------

2. रिक्तस्थानं पूरयत–

1. यगणस्य लक्षणम्– ---------------।
2. '–∪–' अयं गणः --------------- ।
3. '– – –' अस्य गणस्य नाम ----------- ।

3. अधोदत्तानां श्लोकपादानां प्रस्तारं विलिख्य गणविभागं लिखत –

1. गणविभागः– ------------------------------------------
   प्रस्तारम् – ------------------------------------------
   नमो नमः शर्वसुताय तस्मै
2. गणविभागः– ------------------------------------------
   प्रस्तारम् – ------------------------------------------
   नमो नमः विघ्ननिवारकाय ।
3. गणविभागः– ------------------------------------------
   प्रस्तारम् – ------------------------------------------
   उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः

***********

# प्रश्नपत्रिका–

1. **सूक्तोत्तरं चित्वा समीचीनम् उत्तरं लिखत ।** **5x1 = 5**

1. 'पठिष्यति' अस्य उत्तमपुरुष–बहुवचनरूपम् इदं भवति ।

A) पठिष्यथ B) पठिष्यामः C) पठिष्यति D) पठिष्यन्ति

---------------------------------------------------------------

2. पठित्वा– क्त्वाप्रत्ययः :: विस्मृत्य – ------ अत्र चतुर्थपदम् इदं वर्तते ।

A. तुमुन् प्रत्ययः B. ल्यप् प्रत्ययः C. तिङ्प्रत्ययः D. सुप्प्रत्ययः

---------------------------------------------------------------

3. क्रियापदस्य नामान्तरम् इदं भवति ।

A) सुबन्तम् B) कृदन्तः C) धातुः D) तिङन्तम्

---------------------------------------------------------------

4. गणविभागम् अस्मिन् शास्त्रे कुर्वन्ति ।

A. वेदान्तशास्त्रे B. छन्दश्शास्त्रे C. नाट्यशास्त्रे D. गणितशास्त्रे

5. 'बालकः पुस्तकं संपठ्य उत्तरं लिखति' अत्र उपसर्गः अस्ति ।

A. पु B. सम् C. उ D. बा

---------------------------------------------------------------

2. **एकवाक्येन उत्तरं लिखत–** **3x1 = 3**

1. ज्ञाने केषाम् अधिकारः अस्ति ?

---------------------------------------------------------------

2. छन्दश्शास्त्रस्य आद्यः प्रवर्तकः कः ?

---------------------------------------------------------------

3. कति गणाः सन्ति ?

---------------------------------------------------------------

3. **अधोलिखितेषु वाक्येषु कृदन्त–क्रियापदानि पृथक् कुरुत–** **2x1 = 2**

1. अध्यापकः शालां गत्वा पाठयति ।
2. बालकः जलं पीत्वा गच्छति ।

**************